# माध्यमिक परीक्षा, 2025–2026
# नमूना प्रश्न–पत्र
## विषय – संस्कृत
## कक्षा–10

समय : 3 घण्टे 15 मिनट | पूर्णांक : 80

परीक्षार्थिभ्यः सामान्यनिर्देशाः–

1. परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामांकः अनिवार्यतो लेख्यः।
2. सर्वे प्रश्नाः अनिवार्याः।
3. सर्वेषां प्रश्नानामुत्तराणि उत्तरपुस्तिकायामेव लेख्यानि।
4. एकस्य प्रश्नस्य सर्वेषां खण्डानामुत्तराणि एकत्रैव लेख्यानि।
5. सर्वेषां प्रश्नानामुत्तराणि संस्कृतमाध्यमेनैव लेखनीयानि।

### खण्ड–अ

1. बहुविकल्पात्मकप्रश्नाः–

(i) 'शुचिपर्यावरणम्' पाठानुसारेण केषां माला रमणीया? 1
(अ) मौक्तिकानाम् (ब) रूप्यकाणाम् (स) पुष्पाणाम् (द) ललितलतानाम्

(ii) 'बुद्धिर्बलवती सदा' कथा कुतः संगृहीताः? 1
(अ) हितोपदेशतः (ब) शुकसप्ततितः (स) बृहत्कथातः (द) पंचतन्त्रतः

(iii) सर्वेष्वपत्येषु जननी कीदृशी भवति? 1
(अ) तुल्यवत्सला (ब) प्रसन्ना (स) कातरा (द) असमम्

(iv) सम्पत्तौ विपत्तौ च केषाम् एकरूपता भवति? 1
(अ) धनिकानाम् (ब) बालानाम् (स) महताम् (द) निर्धनानाम्

(v) कः वातावरणं कर्कशध्वनिना आकुलीकरोति? 1
(अ) काकः (ब) मयूरः (स) कपोतः (द) पिकः

(vi) आत्मनः श्रेयः इच्छन् नरः कीदृशं कर्म न कुर्यात्? 1
(अ) हितम् (ब) प्रियम् (स) अहितम् (द) अनुकूलम्

(vii) '<u>विशीर्णाः</u> गृहसोपानमार्गाः' रेखाङ्कितपदस्य प्रसङ्गानुसारम् अर्थं किम्? 1
(अ) भ्रष्टाः (ब) नष्टाः (स) विलुप्ताः (द) विशिष्टाः

(viii) '<u>अम्भोदाः</u> बहवो हि सन्ति'–अत्र रेखाङ्कितपदस्य प्रसङ्गानुसारं कोऽर्थः? 1
(अ) खगाः (ब) कमलानि (स) पर्वताः (द) मेघाः

(ix) 'प्रकृतिः + एव' इत्यस्य सन्धिपदं किम्? 1
(अ) प्रकृतिरेव (ब) प्रकृति एव (स) प्रकृतिमेव (द) प्रकृत्यैव

(x) 'सञ्चरणम्' इत्यस्य सन्धिविच्छेदोऽस्ति– 1
(अ) सम् + चरणम् (ब) सत् + चरणम् (स) सन् + चरणम् (द) संच + रणम्

(xi) पररूपसन्धेः उदाहरणमस्ति– 1
(अ) कोऽपि (ब) वयमपि (स) शकन्धुः (द) राष्ट्रम्

(xii) 'उपग्रामम्' इति पदे कः समासः? 1
(अ) द्वन्द्वः (ब) अव्ययीभावः (स) कर्मधारयः (द) बहुव्रीहिः

(xiii) 'परितः' इति पदयोगे का विभक्तिः भवति? 1
(अ) प्रथमा (ब) चतुर्थी (स) षष्ठी (द) द्वितीया

(xiv) 'दुह्' धातुयोगे का विभक्तिः भवति? 1
(अ) द्वितीया (ब) तृतीया (स) चतुर्थी (द) पंचमी

(xv) अङ्गविकारे शब्दे का विभक्तिः भवति? 1

BSER

(अ) सप्तमी (ब) पंचमी (स) तृतीया (द) चतुर्थी

(xvi) .................... गृहं गम्यते। अत्र पूरणीयं समुचितपदं किम्? 1

(अ) अहम् (ब) मया (स) माम् (द) आवाम्

(xvii) मम पिता प्रातः (5.15) .................. वादने उत्तिष्ठति। अत्र समुचितसमयवाचकशब्दं किम्? 1

(अ) सपादषड् (ब) सार्धपंच (स) पादोनपंच (द) सपादपंच

(xviii) ''आज्ञापयतु भवन्तः''—रेखाङ्कितपदस्य शुद्धरूपं किम्? 1

(अ) भवन्तौ (ब) भवन्तम् (स) भवते (द) भवान्

2. निर्देशानुसारं रिक्तस्थानानि पूरयत—

(i) अत्यादरः ............................। (शङ्क + अनीयर्) 1

(ii) बालानां ......................... कः न जानाति। (चपल + त्व) 1

(iii) शक्तिः सदा .......................... भवति। (बल + मतुप्) 1

(iv) ...................... कुशलं महाराजस्य? (अपि, एव, विना) 1

(v) योजकः ..................... दुर्लभः। (यत्, इव, तत्र) 1

(vi) एक ......................... खगो मानी वने वसति चातकः। (एव, यथा, तथा) 1

3. अधोलिखितं गद्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत—

संसारे अनेकाः ऋतवः भवन्ति, किन्तु भारतवर्षे षड्ऋतवः प्रमुखाः सन्ति। तासां नामानि वसन्तः, ग्रीष्मः, वर्षाः, शरदः, हेमन्तः, शिशिरः सन्ति। एतासु ऋतुषु वर्षतोः अति महत्त्वम् अस्ति यतो हि भारतदेशः एकः कृषिप्रधान देशः अस्ति। भारतवर्षस्य कृषकाः ग्रामेषु एव वसन्ति ते वर्षायां एवं निर्भराः भवन्ति। ग्रीष्मतापेन सन्तप्तोऽयं लोकः वर्षासमये सुखानुभवं करोति। कृषकाः बलीवर्दान् संमोज्य क्षेत्रकर्षणम् आरभन्ते। क्षेत्रेषु एव भूरि शस्यं प्रजायते। सुवृष्ट्या मानवस्य जीवनं निर्विघ्नं प्रचलति। फलं पुष्पं लता पादपादयः वनस्पतयः प्रसन्नताम् अभिव्यंजयन्ति। सायं समये गावः वनात् प्रतिनिवृत्य गोष्ठमुपगच्छन्ति। युवतयः वृक्षशाखासु दोलानन्दम् अनुभवन्ति। ब्रजस्यमन्दिरेषु घराच्छटादर्शनम् सज्जा प्रारभ्यते वृन्दावने तु सर्वत्र रासलीला दर्शनं भवति।

(क) एकपदेन उत्तरत— 1×2=2

(i) भारतवर्षे कति ऋतवः भवन्ति?

(ii) कया मानवस्य जीवनं निर्विघ्नं प्रचलति?

(ख) पूर्णवाक्येन उत्तरत— 2

के वर्षायाम् एव निर्भराः भवन्ति?

(ग) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत। 1

(घ) भाषिककार्यम्— 1×3=3

(i) 'अनुभवन्ति' इति क्रियापदस्य गद्यांशे कर्तृपदं किम् अस्ति?

(ii) 'संसारे अनेकाः ऋतवः भवन्ति।' अस्मिन् वाक्ये विशेष्यपदं किम् अस्ति।

(iii) ''तासां नामानि....'' अत्र 'तासाम्' इति सर्वनामपदस्य स्थाने संज्ञापदं लिखत।

## खण्ड—ब

4. अधोलिखितयोः वाक्ययोः अङ्कानां स्थाने संस्कृतशब्देषु समयलेखनं करणीयम्। 1+1=2

(i) अहं प्रातः (7:15) .................... विद्यालयं गच्छामि।

(ii) छात्राः प्रातः (11:00) ......................... भोजनं कुर्वन्ति।

5. 'वृक्षे उपरि काकः तिष्ठति।' इति वाक्यं संशोधयत। 2

6. 'छात्राः गुरुं नमन्ति।' इति वाक्यस्य वाच्यपरिवर्तनं कृत्वा लिखत। 2

7. 'नीलोत्पलम्' इति पदस्य विग्रहं कृत्वा समासस्य नामापि लिखत। 2

8. अधोलिखितश्लोकस्य हिन्दीभाषायां सप्रसङ्गं भावार्थं लिखत। 2

आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।
नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति।।

9. अधोलिखितश्लोकस्य अन्वयं मंजूषातः पदानि चित्वा पूरयत— 2

विचित्रे खलु संसारे नास्ति किंचिन्निरर्थकम्।
अश्वश्चेद् धावने वीरः भारस्य वहने खरः।।
अन्वयः–विचित्रे (i) ................. किंचित् (ii) .................. नास्ति। खलु चेत् अश्वः (iii) .............
वीरः (अस्ति, तर्हि) (iv) .................. भारस्य वहने (वीरः)।

| धावने, संसारे, खरः, निरर्थकम् |
|---|

खण्ड–स

10. निम्नलिखितवाक्येषु रेखांकितपदमाधृत्य प्रश्ननिर्माणं कुरुत– 1×3=3
(क) सिंहः वानराभ्यां स्वरक्षायाम् असमर्थः एवासीत्।
(ख) तत्र राजसिंहो नाम राजपुत्रः वसति स्म।
(ग) तत्त्वार्थस्य निर्णयः विवेकेन कर्तुं शक्यः।

11. ''जननी तुल्यवत्सला'' इति पाठस्य सारं हिन्दीभाषायां लिखत। 3

अथवा

''सौहार्दं प्रकृतेः शोभा'' इति पाठस्य सारं हिन्दीभाषायां लिखत।

12. अधोलिखितं गद्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत–
विचित्रा दैवगतिः। तस्यामेव रात्रौ तस्मिन् गृहे कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः। तत्र निहितामेकां मंजूषाम् आदाय पलायितः। चौरस्य पादध्वनिना प्रबुद्धोऽतिथिः चौरशङ्कया तमन्वधावत् अगृहणाच्च, परं विचित्रमघटत। चौरः एव उच्चैः क्रोशितुमारभत ''चौरोऽयं चौरोऽयम्'' इति। तस्य तारस्वरेण प्रबुद्धाः ग्रामवासिनः स्वगृहाद् निष्क्रम्य तत्रागच्छन् वराकमतिथिमेव च चौरं मत्वाऽभर्त्सयन्। यद्यपि ग्रामस्य आरक्षी एव चौर आसीत्। तत्क्षणमेव रक्षापुरुषः तम् अतिथिं चौरोऽयम् इति प्रख्याप्य कारागृहे प्राक्षिपत्।
(क) एकपदेन उत्तरत– 1
चौरः कुत्र प्रविष्टः?
(ख) पूर्णवाक्येन उत्तरत– 2
यद्यपि कः एव चौरः आसीत्?
(ग) भाषिककार्यम्– 1×2=2
(i) ''उच्चै क्रोशितुम् आरभत'' अत्र विशेषण पदं लिखत।
(ii) तत्र निहितामेकां मंजूषाम् आदाय पलायित। अस्मिन् वाक्ये क्रियापदं किम्।

अथवा

ज्वालामुखपर्वतानां विस्फोटैरपि भूकम्पो जायते इति कथयन्ति भूकम्पविशेषज्ञाः। पृथिव्याः गर्भे विद्यमानोऽग्निर्यदा खनिजमृत्तिका–शिलादिसंचयं क्वथयति तदा तत्सर्वमेव लावारसताम् उपेत्य दुर्वारगत्या धरां पर्वतं वा विदार्य बहिर्निष्क्रामति। धूमभस्मावृतं जायते तदा गगनम्। सेल्सियश–ताप–मात्राया अष्टाशताङ्कतामुपगतोऽयं लावारसो यदा नदीवेगेन प्रवहति तदा पार्श्वस्थग्रामा नगराणि वा तदुदरे क्षणेनैव समाविशन्ति। निहन्यन्ते च विवशाः प्राणिनः। ज्वालामुद्गिरन्त एते पर्वता अपि भीषणं भूकम्पं जनयन्ति।
(क) एकपदेन उत्तरत– 1
ज्वालामुखैः गगनम् कीदृशम् जायते?
(ख) पूर्णवाक्येन उत्तरत– 2
भूकम्पो कैः अपि जायते?
(ग) भाषिककार्यम्– 1×2=2
(i) 'निहन्यन्ते च विवशाः प्राणिनः।' अत्र विशेष्यपदं लिखत।
(ii) ज्वालामुद्गिरन्त एते पर्वता अपि भीषणं भूकम्पं जनयन्ति। अस्मिन् वाक्ये कर्तृपदं किम्।

13. अधोलिखितं श्लोकं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत–

हरिततरुणां ललितलतानां माला रमणीया।
कुसुमावलिः समीरचालिता स्यान्मे वरणीया।।
नवमालिका रसालं मिलिता रुचिरं संगमनम्।

(क) एकपदेन उत्तरत– 1

का रसालं मिलिता?
(ख) पूर्णवाक्येन उत्तरत– 2
मे का वरणीया स्यात्?
(ग) भाषिककार्यम्– 1×2=2
(i) 'मे' इति सर्वनामपदं कस्मै प्रयुक्तम्?
(ii) 'रमणीया माला'–अत्र विशेष्यपदं किम्?

अथवा

भुक्ता मृणालपटली भवता निपीता–
न्यम्बूनि यत्र नलिनानि निषेवितानि।
रे राजहंस! वद तस्य सरोवरस्य,
कृत्येन केन भवितासि कृतोपकारः।।

(क) एकपदेन उत्तरत– 1
के अम्बूनि निपीतानि?
(ख) पूर्णवाक्येन उत्तरत– 2
राजहंसेन किं भुक्ता?
(ग) भाषिककार्यम्– 1×2=2
(i) 'भुक्ता' इति क्रिया पदस्य कर्तृपदं किं?
(ii) 'तड़ागस्य' इति पदस्य अत्र पर्यायपदं किम्?

14. अधोलिखितं नाट्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत–
रामः–कथमस्मत्समानाभिजनौ संवृत्तौ?
विदूषकः–किं द्वयोरप्येकमेव प्रतिवचनम्?
लवः–भ्रातरावावां सोदर्यौ।
रामः–समरूपः शरीरसन्निवेशः। वयसस्तु न किञ्चिदन्तरम्।
लवः–आवां यमलौ।
रामः–सम्प्रति युज्यते। किं नामधेयम्?
लवः–आर्यस्य वन्दनायां लव इत्यात्मानं श्रावयामि (कुशं निर्दिश्य) आर्योऽपि गुरुचरणवन्दनायाम् ..................।
कुशः–अहमपि कुश इत्यात्मानं श्रावयामि।
रामः–अहो! उदात्तरम्यः समुदाचारः।
किं नामधेयो भवतोर्गुरुः?
(क) एकपदेन उत्तरत– 1
यमलौ कौ आसन्?
(ख) पूर्णवाक्येन उत्तरत– 2
लवकुशयोः समुदाचारः कीदृशः आसीत्?
(ग) भाषिककार्यम्– 1×2=2
(i) अहमपि कुश इत्यात्मान श्रावयामि। 'अहम्' सर्वनाम पदस्य संज्ञापदं किम्?
(ii) समरुपः शरीरसन्निवेशः। वाक्ये विशेषण पदं किम्?

अथवा

निद्राभङ्गदुःखेन वनराजः सन्नपि तुच्छजीवैः आत्मनः एतादृश्या दुरवस्थया श्रान्तः सर्वजन्तून् दृष्ट्वा पृच्छति–
सिंहः–(क्रोधेन गर्जन्) भोः! अहं वनराजः किं भयं न जायते? किमर्थं मामेवं तुदन्ति सर्वे मिलित्वा?
एकः वानरः–यतः त्वं वनराजः भवितुं तु सर्वथाऽयोग्यः। राजा तु रक्षकः भवति परं भवान् तु भक्षकः। अपि च स्वरक्षायामपि समर्थः नासि तर्हि कथमस्मान् रक्षिष्यसि?
(क) एकपदेन उत्तरत– 1
वनराज कैः तुदन्ति?
(ख) पूर्णवाक्येन उत्तरत– 2

BSER

राजा कीदृशः भवति?

(ग) भाषिककार्यम्– 1×2=2

(i) 'मामेवं तुदन्ति सर्वे मिलित्वा?' अस्मिन् वाक्ये क्रियापदं किम्?

(ii) 'अपि च स्वरक्षायामपि समर्थः नासि।' अस्मिन् वाक्य विशेषण पदं किम्?

## खण्ड–द

15. भवती राजकीय उच्च माध्यमिक विद्यालय–जोधपुरस्य दशम्याः कक्षायाः छात्रा अनुष्का अस्ति। भवते अग्रजाभगिने विवाहोत्सवं वर्तते, अतः स्वप्रधानाचार्याय दिनत्रयस्य विवाहोत्सवकाशार्थं प्रार्थना पत्रं लिखतु। 4

अथवा

भवती अनुभा अस्ति। स्वकीयां सखीं प्रति संस्कृतदिवसविषये अधोलिखितं पत्रं मञ्जूषापदसहायतया पूरयित्वा लिखत–

| |
|---|
| रक्षाबन्धन दिवसे, संस्कृतदिवसम्, मह्यम् भाषणम्, गीतम्, संस्कृतभाषा नमस्ते कुशलम् |

प्रिय सखि अदिति! दिनांक 18 अगस्त, 20××

सादरं (i) ...................... ।

अत्र (ii) ..................... तत्रास्तु। समग्रदेशे (iii) ....................... संस्कृतदिवसः परिपाल्यते। वयमपि तदा विद्यालये (iv) ........................ पालयामः। अहमपि संस्कृतदिवसे संस्कृतं (v) ................. गायामि। मम सखी संस्कृते (vi) .................. ददाति। एषा (vii) ................... सर्वभाषाजननी अस्ति। अतः (viii) .................. संस्कृतं रोचते।

अस्तु नमोनमः

भवदीया सखी

अनुभा

16. अधः प्रदत्त चित्रं दृष्टवा मञ्जूषायां प्रदत्तशब्दानां सहायतया संस्कृतेन अष्टवाक्यानि क्रीडायाः विषये लिखत। 4

| |
|---|
| कंदुकक्रीडा, गेंदक, वल्लक, वैट, कुंटुकम्, क्षिप्या, स्तोभरक्षक, धावति |



अथवा

मञ्जूषायाः उपयुक्तपदानि गृहीत्वा मित्रयोः 'जयपुर भ्रमणम्' इति विषये संवादं पूरयत– 4

| |
|---|
| जयपुरं, मित्रैः कार्याक्रम, दर्शनीयम्, किमपि, कुत्र, हवामहल, भित्ति, गुलाबी |

कोमलः – जीनू! श्वः भवान् ..................... गमिष्यति।

जीनूः – अहं श्वः ...................... गमिष्यामि।
कोमलः – तत्र ...................... कार्यं वर्तते?
जीनूः – कार्यं नास्ति, अहं तु ........................ सह भ्रमणार्थ गच्छामि।
कोमलः – कुत्र–कुत्र भ्रमणस्य ........................ अस्ति?
जीनूः – आमेर दुर्ग, जयगढ़ दुर्ग ........................... इत्यादय स्थाने।
कोमलः – जयपुर नगरं परितः ........................ अस्ति।
जीनूः – जयपुर ....................... सिटी नाम्ना प्रसिद्धः अस्ति।

17. अधोलिखितेषु वाक्येषु केषांचन चतुर्णां वाक्यानां संस्कृतभाषया अनुवादं कुरुत– 4

(i) पेड़ के ऊपर पक्षी बैठे हैं।
(ii) अनीता ने आज खाना नहीं खाया।
(iii) राजा प्रजा को धन देता है।
(iv) हम दोनों गाना गाते हैं।
(v) मेरे पिताजी डॉक्टर हैं।
(vi) हम दसवीं कक्षा में पढ़ते हैं।

18. अधोलिखितवाक्यानि क्रम रहितानि सन्ति। यथा क्रमं संयोजनं कृत्वा लिखत। 3

(i) नद्याः तटे फलोपेतः जम्बूवृक्षः आसीत्।
(ii) मकरः वानरेण पातितानि मधुरफलानि आस्वाद्य अचिन्तयत्।
(iii) तस्य शाखायां वानरः वसति स्म।
(iv) वानरः मकरस्य प्रयासं बुद्धि चातुर्येण विफलीकृतवान्।
(v) एकदा एकः मकरः नद्यां वसति स्म।
(vi) ''फलानि अतिमधुराणि'' अतः वानर हृदयं खादामि।

अथवा

मञ्जूषायां प्रदत्तशब्दानां सहायतया ''सत्संगति'' इति विषये षट्–संस्कृत वाक्येषु एकं अनुच्छेदं लिखत। 3

| सतां सङ्गतिः, मानव–जीवने, यशं सुखं च, दोष निवारणः, विचारधारा, गुणयुक्त |
|---|